ISSN 2348-9847

प्रारम्भाब्दः १९६४ ई.तः

अङ्कः ५२

वर्षम् - ५२

# सुरभारती

## (शताब्दी विशेषाङ्कः)

### वार्षिकी शोधपत्रिका २०१५ -१६



THE MAHARAJA SAYAJIRAO UNIVERSITY OF BARODA

सत्यं शिवं सुन्दरम्

पारम्परिकसंस्कृताध्ययनविभागः

बरोडासंस्कृतमहाविद्यालयः

महाराजसयाजीरावविश्वविद्यालयःवटोदरम्

# अनुक्रमणिका


| विषयाः | लेखकाः | पृ.सं. |
|---|---|---|
| | शुभसंदेशः कुलाधिपतिः | |
| | शुभसंदेशः कुलपतिः | |
| | शुभसंदेशः प्रधानसम्पादकः | |
| Note From th Chief Editor | | |
| संपादकीयम् | | |
| १. उव्वटप्रयुक्तव्याख्यापद्धतिविश्लेषणम् | प्रो. देवेन्द्रनाथ पाण्डेयः | १ |
| २. कालिदासस्य वैश्विकं चिन्तनम् | डॉ. तुलसीदास परौहा | ५ |
| ३. उपनिषत्सु शैक्षिकदर्शनम् | जानकीशरणः | १२ |
| ४. वैदिकशिक्षाव्यवस्थायाः साम्प्रतकाले उपादेयता | डॉ. भावप्रकाश एम.गांधी | २२ |
| ५. आधुनिकशिक्षायां वैदिकशिक्षायाः प्रभावः | डॉ. शत्रुघ्नपाणिग्रही | २७ |
| ६. बुद्धियोगः | डॉ. कृष्णप्रसाद निरौला | ३१ |
| ७. अन्योन्याश्रदोषपरिहारविचारः | प्रो. विनोदकुमार झा | ३६ |
| ८. आम्नायसम्मतं समभावसमीक्षणम् | डॉ. प्रयागनारायण मिश्र | ४१ |
| ९. समालोचना | डॉ. रामपाल शुक्ल | ४६ |
| १०. आख्यानपरम्परायाम् महाभारतस्य व्याप्ति | प्रो. हरिप्रसाद पाण्डेयः | ४८ |
| ११. तन्त्रज्ञो महामुनिः पाणिनिः | क्षितीश्वर नाथ पाण्डेय | ५३ |
| १२. वर्तमानसामाजिकविषङ्गतिसमाधाने संस्कृतसाहित्यस्य प्रासङ्गिकता | डॉ. अमृतलालः भोगायता | ५७ |
| १३. सत्यव्रतशास्त्रिप्रणीते श्रीरामकीर्तिमहाकाव्ये विशेषच्छन्दोवलोकनम् | डॉ. ललित पटेलः | ६० |


विनोद झा

ISSN 2348-9847

# अन्योन्याश्रयदोषपरिहारविचारः

प्रो. विनोद कुमार झा

चतुर्दशसूत्रेषु णकाराद्यन्तवर्णानां 'एषामन्त्या इतः' इति वाक्येन इत्संज्ञा प्रतिज्ञाता । सा च इत्संज्ञा णकाराद्यन्तवर्णानां 'हलन्त्यम्' इति सूत्रेण वक्तव्या । 'हलन्त्यम्' इति सूत्रस्य वृतिः हल्पदार्थज्ञानान्तरमेव सम्भवति । हल्पदार्थज्ञानं, चतुर्दशे माहेश्वरसूत्रे 'हल' इत्यस्मिन् लकारस्य इत्संज्ञायां सत्यां 'आदिरन्त्येन सहेता' (१/१/७१) इति सूत्रेण 'हल' प्रत्याहारनिर्माणानन्तरं भवतुमर्हति । 'आदिरन्त्येन सहेता' सूत्रेण 'हल' इत्यस्मिन् महेश्वरसूत्रे लकारस्य 'हलन्त्यम्' (१/१/३) इति सूत्रेण इत्संज्ञायां सत्यां भवितुमर्हति । एवम्प्रकारेण 'हलन्त्यम्' सूत्रस्य ज्ञानं 'आदिरन्त्येन सहेता' सूत्राधीनमस्ति तथा च 'आदिरन्त्येन सेहता' सूत्रस्य ज्ञानं 'हलन्त्यम्' सूत्राधीनमस्ति, तस्मादस्ति स्वज्ञप्त्यधीनज्ञप्तिकत्वम् अन्योन्याश्रयत्वम् इत्यनुरोधेन परस्परम् अन्योन्याश्रयः।

एवम्प्रकारेण 'हलन्त्यम्' इति सूत्रस्य वाक्यार्थबोधाय 'हल्' पदार्थस्य ज्ञानम् आवश्यकं तदर्थश्च लकारस्य इत्संज्ञा । 'हल्' पदार्थस्य ज्ञानाय आवश्यकी लकारस्य इत्संज्ञां विधातुं 'हलन्त्यम् 'सूत्रं दविरावृत्य आवृत्तेन हलन्त्यम् (१/३/३) इति सूत्रेण 'हल्' इत्यस्मिन् चतुर्दशे माहेश्वरसूत्रे लकारस्य इत्संज्ञा क्रियते ।एकपदात्मकमिदं सूत्रमस्ति । लकारस्य इत्संज्ञानन्तरं 'आदिरन्त्येन सहेता' इति सूत्रेण 'हल्' प्रत्याहारनिर्मिते ज्ञाते च उपदेशावस्थानां अन्त्यस्य हल् 'हलन्त्यम् ' इति सूत्रेण इत्संज्ञा भवति । एवं रीत्या अन्योन्याश्रयदोषस्य परिहासो जायते ।

अत्र आवृत्ते एकपदात्मके 'हलन्त्यम्' इति सूत्रे कः समासरिति जिज्ञासायां उच्यते हलि अन्त्यमिति हलन्यत्यम् । सप्तमीतत्पुरुषसमासोऽत्र । न च हलिअन्त्यमिति हलन्त्यम् इत्यत्र 'सप्तमी शौण्डै' इति सूत्रस्य योगविभभागान्तरं योगविभागेन 'सप्तमी' इति सूत्रेण समासःकरणीयमिति वाच्यम् , योगविभागस्य भाष्येऽदर्शनात् । नैव 'सुप्सुषां' इति सूत्रेण भवेदिति वाच्यम् तस्य यस्य कुत्रापि न गतिः तस्य काश्यां गतिरिवअगति कगति त्वात् । अतः हलोऽन्त्यमिति हलन्त्यम् अत्र 'षष्ठी' इति सूत्रेण षष्ठीतत्पुरुषसमासो ज्ञेयः । 'हलन्तय्म्' सूत्रे एकदेशस्य हल् इत्यस्य तन्त्रावृत्येशेषेषु अन्यतमः स्यादिति । सकृदुच्चरितत्वं सति अनेकार्थ बोधकत्वं तन्त्रत्नम् ।

लघुशब्देन्दुशेखरेऽपि उक्तमस्ति यत् न विभक्तौ तुस्माः इत्यादेः सार्थक्याय 'हलन्त्यम्'इति सूत्रस्य उपदेशेऽन्त्यं हल् इत् स्यात् इत्यर्थस्य आवश्यकत्वेन 'हलन्त्यम्' 'आदिरन्त्येन सहेता' इत्यनयोरुपर्युक्तरीत्या परस्परापेक्षत्वेन अन्योन्याश्रयात् , लकारे इत्संज्ञाम् अबोधयित्वा हलाम् इत्संज्ञाबोधनं पाणिनेरयुक्तम् , अतः महाभाष्ये अन्योन्याश्रयमाशङ्क्य 'हलन्त्यम्' इत्सज्ञं भवति , लकारश्चेद्भवतीति वक्तव्यमित्युक्त्वा– एकशेषनिर्देशाद्वा सिद्धम् हल् च हल् च हल्–हलन्त्यमित् इत्युक्तम् । तस्यायं भावः 'कृतेकशेषेण हल्पां सम्बन्धसामान्यषष्ठ्या समामोऽन्त्यशब्दस्य च द्वन्द्वान्ते श्रूयमाणस्येवोभयत्रान्वयः एवञ्च हल्सूत्रान्त्यं

हलूपान्त्यञ्चेति बोधः अन्त्ये राहोः शिरः इतित्षष्ठी''ति । अत्रोच्चारयितुरेकशेषनिर्देशो बोद्धुस्त्वावृत्या बोधः अर्थात् महाभाष्ये महाभाष्यकारो भगवान् पतञ्जलिः 'हलन्त्यम्' इति सूत्रोपरि अन्योन्याश्रयम् आशङ्क्य अन्त्यस्य हल इत्संज्ञा भवति तथा च लकारस्य इत्संज्ञा भवतीति उक्तवान् । एवं कथं सम्भवति इति प्रश्ने महाभाष्यकारेण उच्यते -एकशेषनिर्देशेन एवं सम्भवति अर्थात् 'हलन्त्यम्' सूत्रे हलि पदे पाणिनिना एकशेषः कृतोऽस्ति। हल् च हल् च हल् एवम्प्रकारेण एकशेषनिर्देशेन एकस्मिन् हल्पदे हल्द्वयं वर्तते । अत्र एकेन हला हल् प्रत्याहारस्य तथा द्वितीयेन हला चतुर्दशं माहेश्वरसूत्रं 'हल्' इति गृह्यते । एकशेषानन्तरं हलि पदे सम्बन्धसामान्ये भेदबोधिकां षष्ठीं विभक्तिं विधाय 'षष्ठी' इति सूत्रेण षष्ठ्यन्तस्य हल् ङस् इति समर्थसुबन्तस्य अन्त्य सुं इति समर्थसुबन्तेन सह षष्ठीसमासानन्तरं द्वन्द्वादौ द्वन्द्वमध्ये द्वन्दवान्ते च श्रूयमाणं पदं प्रत्येकमभिम्बध्यते इत्यनुसारं द्वन्द्वान्ते श्रूयमाणस्य अन्त्यशब्दस्य प्रत्येकं हला सह अन्वयो भवति । न च 'हल' पदेन प्रत्याहारे स्वीकृते हल् एव अन्त्यं वर्तते अन्त्यमेव हल् वर्तते, तस्माद् हलन्त्ययोः पदयोर्मध्ये अभेदान्वयाद् भेदख्यापिव षष्ठी विभक्तिः षष्ठीतत्पुरुषसमाश्च कथं भवितुं शक्नोतीति वाच्यम् । अन्त्येन 'हल्' प्रत्याहारबं अन्त्यशब्दस्य राहोः शिरः इतिवत् अन्वयात् । अर्थात् हलि स्वनिरूपितावयवत्स्य आरोपः क्रियते , ये हल्पवाद्च्ये अवयविता अन्त्यपदवाच्ये अवयवता च उत्पन्ना भवति । उच्चारयिता तु एकशेषेण निर्देशं कर्तुं शक्नोति , परं बोधधुस्तु आवृत्या बोधो भवति, तस्मात् उभयविधस्य हल्पदस्य अन्त्यशब्देन सह समासनन्तरं 'हलन्त्यम्' 'हलन्त्यम्' इति आवृत्या बोद्धुर्बोधो भवति । तत्र प्रथमेन हलन्त्यम् सूत्रेण हल् सूत्रस्थस्य लकारस्य इत्संज्ञा, आदिरन्त्येन सहेता इति सूत्रेण लकारेण सह हल् प्रत्याहारस्य सिद्धिस्तथा द्वितीयेन 'हलन्त्यम्' सूत्रेण उपदेशावस्थायाम् अन्त्यस्य हलः इत्संज्ञा क्रियते, येन अन्योन्याश्रयदोषः परिह्रियते ।

प्राप्तं हल् हस्य ल इति षष्ठीसमासः सामीप्यञ्च षष्ठयर्थीरिति महावैयाकरणेन कैयटेन मन्यते, किन्तु तथा सति महाभाष्ये हल् इत्संज्ञ भवति, हलन्त्यञ्चेदिति उल्लिखितं भवेत् । सामीप्यं षष्ठ्यर्थरि्ति स्वीकारे ब्राह्मणस्य कम्बलरिति ब्राह्मणकम्बलरित्यादौ ब्राह्मणसमीपवर्तिन अन्यदीयकम्बलस्यापि प्रतीतिः प्राप्नोति या लोकव्यवहारे न दृश्यते । एवमेव चित्रा गाव अस्येति चित्रगुरित्यत्र चित्रगवीणां समीपवर्तिन वृक्षादेः प्रतीतिः प्राप्नोति, किन्तु एषा प्रतीतिरपि लोकव्यवहारे अनुपलभ्यते न केवलं समासे ब्राह्मणस्य कम्बलरिति व्यस्तप्रयोगेऽपि ब्राह्मणसमीपवर्तिनः अन्यदीयकम्बलस्य प्रतीतिर्न भवति । नैव चित्रा गाव अस्येति व्यस्तप्रयोगेऽपि समीपवर्ती वृक्षादिः प्रतीयते, अतः सामीप्यं षष्ठ्यर्थीरिति स्वीकर्तुमप्यशक्योऽस्ति ।

हल् च ल् चेति हल् इति समाहारद्वन्दवः । द्वितीयलकारस्य संयोगान्तस्य लोपः इति सूत्रेण संयोगान्तलोपः षष्ठीसमासः 'हलन्त्यम् ' सूत्रेण हल ् सूत्रस्थस्य लकारस्य च इत्संज्ञाया सत्यां उपर्युक्तप्रकारेण अन्योन्यश्रयदोषपरिहार स्यादिति वाच्यम् यणः प्रतिषेधो वाच्यः'' इति वार्तिकेन यणः लोपस्य प्रतिषेधेन संयोगान्तलोपस्य दुर्लभत्वात् । यणः प्रतिषेधो वाच्यः इति वार्तिकस्य प्रत्याख्यानपक्षेऽपि 'झलो झलि' इति सूत्राद झल्ग्रहणमपकृष्य संयोगान्तस्य लोपः इत्यनेन संयोगान्तस्य झलः लोपविधानात् । किञ्च पदार्थबोधं विना वाक्यार्थबोधासम्भवेन हल् प्रत्याहारसिद्धयेः प्राग् 'हलन्त्यम् 'सूत्रस्य वाक्यार्थाऽभावे प्रसक्ते तस्य उद्धाराः आवृत्तिरुपप्रयत्नोऽयं क्रियते । अस्यां परिस्थितौ हल् शब्दार्थाऽप्रसिद्धौ द्वन्द्व एव दुर्लभोऽस्ति, सहविवक्षाया अभावात् तस्मात् अन्योन्याश्रयदोषपरिहाराय आवृत्तिरुपोपाय एव समीचीनोऽस्ति ।

'हयवरट्' इत्यतराभ्य 'हल' सूत्रपर्यन्तं दशसूत्राणाम् आवृत्तिं विधाय अनन्तर 'हयवरट' सूत्रादारभ्य 'शषसर' सूत्रपर्यन्तं समुदायमुद् श्य तस्य समुदायस्य 'हल्' इति सूत्रेण हल् इति संज्ञा विधेयेति वाच्यम् दशसूत्रावृत्तौ गौरवात् ।

प्रश्न–अन्योन्याश्रयदोषस्य निदानाय 'उपदेशेऽननुनासिक इत् ' 'हलन्त्यम्' इति सूत्रद्वयस्य स्थाने सूत्रत्रयमस्तु–'उपदेशे इदन्त्यम् 'अच' अनुनासिकः इति । तत्र प्रथमसूत्रस्य अर्थो वर्तते वस्था अन्त्यस्य वर्णस्य इत्संज्ञा भवेत् । सोऽन्त्यवर्णोऽच् भवेद् हल् वा उभयोरपि ÷इत्संज्ञा स्यात् प्रथमसूत्रेण अन्त्यस्य हलः इत्संज्ञाया सत्यां 'आदिरन्त्येन सहेता' इति सूत्रेण 'अण्' आदिप्रत्याहाराणां सिद्धौ नास्ति कश्चन संशयः । नैन हल् प्रत्याहारस्य सिद्धिकारणादस्ति अन्योन्याश्रयदोष :। द्वितीय सूत्रं विद्धयते ।'अच्' इति सूत्रेण अनन्त्यस्य अच इत्संज्ञा भविष्यति ।न रु श्रु चेत्यादिषु अजन्तेषु उपदेशे इदन्त्यम् इति प्रथमसूत्रेण अन्त्यस्य अच इत्संज्ञा भविष्यति । न रु श्रु चेत्यादिषु अजन्तेषु उपदेशे इदन्त्यम् इति प्रथमसूत्रेण अन्त्यस्य अचः उकारस्य च इत्संज्ञा न भविष्यति , फलाभावादिति वाच्यम् स्वरतिसूतिसूयतिधूञदितो वा इत्यादिसूत्रेण तथा 'उदितो वा' इति सूत्रेण वैकल्पिक इडागमविधानरूपफलस्य सत्वात् । भ रु श्रु चेत्यादिषु अजन्तेषु धातुषु अचः इत्संज्ञा ति? इति प्रश्नः स्वयमेव उत्तरितो भवति यतोहि तृतीयं सूत्रं विद्यते– 'अनुनासिकः' अन्त्यस्य अनन्त्यस्य च उभयविधस्य अचः पूर्वसूत्रद्वयेन इत्संज्ञाया सत्यां तृतीयं सूत्रं व्यर्थीभूय नियम करोति यदि असत्वात् प्रथमसूत्रेण उकारस्य उकारस्य च इत्संज्ञा न जायते ।

त्र अनुनासिकस्य यदि इत्संज्ञा स्यात् तर्हि अच एव स्यादिति विपरीतनियमोऽपि भवितुं शक्नोतीति वाच्यम् ,तथा सति मकारञकारदिहल्वर्णाना इत्संभावात् । अन्यथा विपरीतनियमस्वीकारे सति मिदागमः अन्त्यादचः परो भवेत् इत्यर्थकस्य मिदचोऽन्त्यात् परः इति सूत्रस्य तथा च त्रिति णिति च प्रत्यये परे अजन्ताङ्गस्य वृद्धिः स्याद् इत्यर्थकस्य अचोऽणितिसूत्रस्य व्यर्थता नास्ति दुर्लभा ।

'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति परिभाषानुसारं अनुनासिकः इति तृतीयसूत्रेण अनन्तरस्य अर्थात् समीपस्थस्य 'अच्' सूत्रस्यय विषय एव नियमः स्यात् न तु उपदेशे इदन्त्यम् सूत्रस्य विषयेऽपि इति वाच्यम्,योगविभागसामर्थ्येन 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा इति परिभाषायारत्र अप्रवृत्तित्वात् ।अन्यथा यदि अनुनासिकः इति सूत्रस्य नियमः केवलं 'अच् सूत्रस्य विषय एवं स्यात्तर्हि 'अच्' अनुनासिकः इति सूत्रद्वयस्यस्य स्थाने ला अजनुनासिकः इति सूत्रमेकमेव कर

सूत्रद्वयस्य स्थाने यदि सूत्रत्रयं क्रियते चेत् पाणिनिसूत्रभेदो भवति , तस्मात् पाणिनिसूत्रपरायणे या अष्टफलस्य प्राप्तिर्भवति सा भवितुंन शक्नोति तथा च एततात्पर्यबोधकं तत्र तत्र भाष्यमपि वर्तते अपाणिनीयन्तु भवतीति वाच्यम् सूत्रभेदः सः कथ्यते कस्यचित् सूत्रस्य स्थाने अन्यत् सूत्रं क्रियते अथवा अधिकं सूत्रं क्रियते । यदि तदेव सूत्रम् उपसंहृत्य –संक्षिप्त सूत्रं क्रियते नासौ सूत्रभेदः दोषाय भवतीति अच उपसर्गातः सूत्रभाष्ये उक्तत्वात् । अस्य तात्पर्यमिदं वर्तते यत् यदि सम्भवः स्यात् तर्हि दृष्टफलद्वारैव वेदाङ्गानाम् अदृष्टार्थत्वं–



विनोद

पुण्यजनकत्वं कल्पनीयम्, तत्र त ज्ञापकपरसकलभाष्योच्छेदो न ति । एवम्प्रकारेण हल्ग्रहणमपि न कर्तव्यं भवति सहैव अन्योन्याश्रयदोषस्य निवारणमपि जायते ।

उत्तरम्- योगविभागनियमज्ञापकातिश्रणणेऽतिरगौरवात् ।अर्थात् पूर्व सूत्रद्वयस्य स्थाने सूत्रत्रयस्य सम्पादनं सूत्रद्वयेनैव कार्य भवितुं शक्नोति तस्मात् तृतीयं सूत्रं व्यर्थीभूय नियमस्य ज्ञापकं भवति । अनन्तरं योगविभागसामर्थ्याद् विपरीतनियमस्य निराकरणम् एतत्सर्वस्य सम्पादने ज्ञानजनकमनोव्यापाररुपं गौरवं भवति तथा एषा राजाज्ञाऽपि नास्ति यत् वर्णाभिव्यक्तिजनककण्ठाद्यभिघातगौरवमेव आदर्तव्यं विद्यते नतु मानजनकमनोव्यापाररूपं गौरवम् , अत एव अन्योन्याश्रयदोषपरिहाराय 'हलन्त्यम्' सूत्रस्य आवृतिरूपोपाय एव उचितो वर्तते ।

प्रश्न-अन्योन्याश्रयदोषस्य परिहार एवमपि भवितुं शक्नोति यत् आदिरन्त्येन सहेता इति सूत्रे पठितस्य पहेता पदस्य व्याख्यानम् एवम्भवेत सह समन्तात् एति-गच्छति बुद्धिविषयो भवतीति सहेत मध्यमो वर्णः । अत्र सहेता-शब्दः योगरूढो वर्तते । योगशक्त्या सह एति-गच्छति -बुद्धिविषयौ भवति इति र्थस्य प्रतीतिर्भवति तथा रुढिशक्त्या मध्यवर्णाना व शब्दस्य एतत्प्रकारके अर्थस्वीकारे आदिरन्त्येन सहेता इति सूत्रस्य अर्थो भवति-सहेता-मध्यमो वर्णः अन्त्यसहितादसंज्ञकः अणादिसंज्ञको स्यात् । अत्र सहेता-मध्यमो वर्णः संज्ञौतथा आद्यन्तः-अणादिः संज्ञावाचको वर्तते ।आदिवर्णेन अन्त्यवर्णेन च सह मध्यमवर्णानाम् एकबुद्धिविषयतासम्पादेन यस्य प्रत्याहारस्य अपेक्षा भविष्यति तस्य प्रत्याहारस्य आद्यन्ताभ्यां वर्णाभ्यां सह मध्यपातिनां वर्णानां बोधसम्पादनद्वारा हलित्यादीनां प्रत्याहाराणां परिज्ञानेन'हलन्त्यम्' सूत्रस्य वाक्याथबोधाय आवश्यकहल्पदार्थस्य ज्ञानसम्भवात् अन्योन्यश्रयदोषो नास्ति ।

उत्तरम- उपर्युक्तप्रकारेण 'आदिरन्त्येन सहेता' इति सूत्रस्य अर्थस्वीकारे सति अन्योश्रयदोष एव नास्ति, तस्माद् महाभाष्ये 'हलन्त्यम्' सूत्रोपरि स्वीकृतरन्योन्याश्रयदोषः तथा च तस्य परिहाराय कृतः प्रयत्नो व्यर्थो भवति । महाभाष्यकारेण कृतः प्रयत्न व्यर्थो न भवति , न्योन्याश्रयदोषपरिहाराय सहेता पदस्य अर्थपरिवर्तनरूपप्रयासोऽसमीचीनो वर्तते । अत एव भगवता पतञ्जलिना सहेता इता इत्यत्र (आइ) पूर्वकात् कटी वी धातौ प्रश्लिष्टात् 'इ' धातोः अथवा दैवादिगणीयात् 'ईङ्' (गतौ) तृच् प्रत्ययो स्वीक्रियते । सहेता इत्यत्र 'ईङ्' (अध्ययने) ईक् (स्मरणे) रपि ग्रहणं नास्ति, तयोः नित्यमेव 'अधि' उपसर्गपूर्वकप्रयोगात् । नैव 'ईण्' (गतौ)धातौः ग्रहणमस्ति, तत्र 'एत्येधत्यूठसु इति सूत्रेण इति सूत्रेम् वृद्धिप्रसङ्गात् । योगशक्त्या सहेता मध्यमो वर्णः इत्यर्थस्य लोभोऽपि न भवति । नैन तस्य काऽपि उपयोगिता वर्तते, तस्मात् आसमन्तात् इत्यर्थ- व्यर्थरेव विद्यते । यदि उच्यते सहेता मध्यमो वर्णः इति रूढोऽर्थो विद्यते तर्हि किमपि प्रमाणं नास्ति ।

अतःअन्योन्याश्रयदोषस्य परिहारा श्रीमद्भट्टोजिदीक्षितेन कृतस्य सम्पूर्णस्य 'हलन्त्यम्' सूत्रस्य आवृत्तिरूपोपाय एव उचितौ वर्तते ।

# सुरभारती

१. ज्ञप्तिः ज्ञानम्
२. पाणिनीय–÷अष्टाध्यायौ सूत्रपाठः
३. पाणिनीय–÷अष्टाध्यायी सूत्रपाठः
४. पाणिनीय–÷अष्टाध्यायौ सूत्रपाठः
५. पाणिनीय–÷अष्टाध्यायौ सूत्रपाठः
६. पाणिनीय–÷अष्टाध्यायौ सूत्रपाठः
७. पाणिनीय–÷अष्टाध्यायौ सूत्रपाठः
८. पाणिनीय–÷अष्टाध्यायौ सूत्रपाठः
९. पाणिनीय–÷अष्टाध्यायौ सूत्रपाठः
१०. पाणिनीय–÷अष्टाध्यायौ सूत्रपाठः
११. पाणिनीय–÷अष्टाध्यायौ सूत्रपाठः
१२. पाणिनीय–÷अष्टाध्यायौ सूत्रपाठः
१३. पाणिनीय–÷अष्टाध्यायौ सूत्रपाठः
१४. पाणिनीय–÷अष्टाध्यायौ सूत्रपाठः